स्तादिति २६ ईश्वरोपासनप्रवृद्धसत्त्वबलाद्यामोहघनहस्तैः द्यामस्य तमसः इमां प्रसिद्धां मामोहशक्तिं जित्वा गु
रुशास्त्रोपदेशविश्वासवता मनसा यमस्येन्द्रियमनोनियमनालकं सुयोगस्याध्यानमनुसर २६ ततः
दाणं मुहूर्तं द्वादशतमभागमपि समाधाय समाधिमात्रिसते नात्मदर्शनेन तत्प्राक्रमोल्लता बुद्धिरूपा रज
नी रात्रिर्विभात्प्रभावं गच्छतु २७ ननु सत्कर्मानुष्ठानैरेव चित्तशुद्धिसिद्धेः किमर्थमीश्वरोपासनं तत्राह नु
हेशेति २८ न त्वाभिजात्यसदाचारतपःकर्माद्यप्रतनपुरुषप्रयत्नानां प्राक्तनकर्मापेक्षया प्राबल्यप्राकृतसप्तित

साकारं भजताबद्धं यावत्सत्त्वं प्रसीदति निराकारे परे तत्त्वे ततः स्थितिरकृत्रिमा २५ इमां मुह्यामतमसो जि
त्वा सत्त्वबलाद्ध्रुवं यमस्यानुसराध्यानं विस्तेनान्तरात्मना २६ साभाधायपदाणं पश्य प्रसंगात्मानमात्मना
इयं विभात्त्सामक्तं प्राग्बुद्धिरजनीतव २७ कृतपुरुषकारेण केवलेन च कर्मणा महेशानुग्रहादेव प्राप्त
व्यप्राप्यते नरैः २८ नाभिजात्यं न चारित्रं न तपो न च विक्रमः बलवत्पुरुषाणां निखिले कर्माणि केवलं २९
अप्रतर्क्यात्प्रतीकारात्किमेवमवसीदसि नलं पतितललाटस्याभीश्वरोपदवावली ३०

तत्कथमिदानीमीश्वरानुग्रहापेक्षोच्यते तत्राह नाभिजात्यमिति पुरातनकर्मणामनन्तत्वादिदानीन्तनपुरुष
प्रयत्नानामल्पतरत्वान्नेश्वरानुग्रहमन्तरेण तज्जयसिद्धिः ईश्वरानुग्रहात्तु हाप्यहहदिक्कु त्वेव प्रायोगेहि
कप्रयत्नप्राबल्यसाधितेन तद्विहायेतिभावः तर्हीश्वरोपास्तिरेव कार्या किं परसनियमज्ञानादिभिस्तत्राह
अप्रतर्क्यादिति एवमीश्वरप्रयत्नापि लभ्यप्रतर्क्यो लौकिकपतकर्णगम्यादृष्टैकसमधिगम्याद्यमादिसहितज्ञा 
तलद्वाणात्प्रतीकारात्समूलसर्वकर्मनिरासोपायात् किमर्थमवसीदसि मुह्यसि यत्तदुपासनाप्रसादे 

अविविक्तः अविवेकी ननु तत्त्वविदामपि कदाचिद्व्यामोहः कथं दृश्यते तत्राह तस्येति विडंबनपत्र चेष्टानुकरण
मात्रं २९ अन्येषां तु नतथा तेषाम विद्यादितात्मनां जलेषु स्थलबुद्धिवद् नालस्वात्मताभ्रांतेरित्याह तन्त्वेति
यथा अज्ञालोकानां जलेषु स्थलमिति संशयो रम्स्य स्थलेषु च जलमिति संशयस्तथा कल्पितभेदे बालस्तु यि सशा
यो भ्रमइत्यर्थः ३० यदा परमार्थ्यादिमयजगद्धारी लापि विवेपिशोकप्रसक्ति नास्ति तदामायामयजगद्धादे दूरापा
स्तैवत्येत्याशयेनाह दृष्ययादीति जो गतो नष्टः तन्मतेपि देहादेरनात्मत्वेन तन्नाशो आत्मभावादित्यर्थः ३१ प्रियना
शाद्शोकप्रसक्तिः स प्रियो यदि सन्नन्दान नश्यत्येव यद्यसन् तर्हि न स्थित एवेत्युभयथापि तत्राशासिद्धेने शोकहे
तुरित्याशयेनाह असत इति संस्थानानां मायिकसंनिवे शविशेषाणां ३२ ननु यदि मायिकमेव देहादिसंस्था

अविविज्ञो जनः शोच्य कस्मान्त्वयह ख्यातिं तत्वविल्हसन्नास्ते तस्य मोहो विडंबनं २९ तत्रैस्ह्वंम
मिदं तत्वंतिरोहितम विद्यया यथा स्थलेषु लोकानां जलेष्वालस्य संशयः ३० दृष्यादिमहाभूतप
रमाणुमयं जगत् स्थितं यदा तदापीह कोगतो योनुशोच्यते ३१ असतः संभवो नास्ति नास्त्यभावः सतः
सर्वे आविर्भावतिरोभावाः संस्थानानाममीपर ३२ किंत्वनेक दुरोत्साहो विषतामुपगच्छति भजसंभ
विताभोगं परमेशं जगद्गुरुं ३३ दुरितानि समस्तानिप न्तं यापि नफ्रुव कुतमेवास्य देवस्य पाशाः वि प्रवतां गताः ॥

नं तर्हि तदैद्रजालिको पदर्शितमायावद् दासीनं तटस्थं भासतां शोकमोह दुःखाद्यनर्थसहस्रदानेलस्य कोहेतु
स्तत्राह किं त्विति सत्यमायुनि कोनकश्चिद्धेतुरस्ति किं त्वनेकः दुरास चितः पुण्यपापप्रक तिलक्षणः उत्साहः
पुरुषप्रयत्नः पुण्यपापात्मस्तत्वे तुरस्ति तस्मादेवायं मायिकोपि देहादिस्तन्मोगाय विषतां विषवन्मरणमुखे
दुःखानर्थसहस्रहेतुतामुपगच्छति अथ्यात्मशास्त्रार्थश्रवणतोप्युपदिष्टः पापवशादेव हृदि नारोहति अतस्तत्पा
पदापापस गुणो श्वरापासनं कुर्वित्याह भजोति भक्तानु ग्रहाय संभरितः सम्यग्घृतः आभोगो वदयमारार्थ्य

नारीश्वरा हि वेभोयेनतं ३३ अद्यापि नफ्यंतेम हीण

वा॰टी॰
नि॰पू॰
३-४

उत्पन्नोऽत्र सर्वे राज्यदार्थे पलायितदुपदिशति सर्वेति ब्रह्मणः प्राणी स्वकर्मणा पापैर्विपक्तः ४७ यावद्
हि निग्रहो ब्रह्मप्रणयितोऽकलीले जले पयसि स्वधिया प्रतिकूलः कुलोपसर्पी विद्विमुः निष्कलेऽपयसि केवलं पयस्
वयमित्यर्थः ४८ अत्र क्व किं करणं विवेकदृष्टिविधायकः एवं शोकाद्यनुत्पादाद्विवेकदृष्ट्युद्घाटनं तावत्स्वज्ञायदृष्टि
४९ हर्षशोकयोस्तरंगैः स्फूर्जोत्साहभंगैः ५० हर्षविषादादिदशालक्षणं दोलाद्वयं जगत् जीवजातं पदूर्मिभि
दाल्भ्यत्वं वा कोऽपि परिभ्रमदा क्षणमङ्गुलैः प्रेरवेदोलायन्त्रैः क्रीडयते कालेन क्रीडते कर्मकाण्डैरुपमाणि
किंतिभुक्त्वा लीलादिना कर्तुः कर्मफलैः न हि क्रीडाकौतुककल्पितेषु पदार्थसंयोग वियोगेषु खेदो युक्त इत्यर्थः

सर्वेसंन्यस्यकर्माणि ब्रह्मणः प्राणीभव नेत्यसेयदिसंसारस्वकावर्तभ्रमः शमं ४७ तावदेवविकल्पोऽस्य
मिदं यावद्विनिग्रहः प्रतिकूलोऽस्त्रिरूक्षोऽकेवले निष्कले पयः ४८ अयं किमेध करणं स्वपाशोकोऽव
लंब्यते निर्वहि पतत्सैनलं प्रज्ञा पृष्ठिरभंगुरा ४९ नजानं ते विजगत्यंते गगनात्सुगरीयसां येतरंगेस्तु
णानी वाह्यंते हर्षशोकयोः ५० समारूढदशादोलामहो रात्रमिदं जगत् क्रीड्यते प क्रियैः प्रेरवे सर्वे कि
मितिखिद्यते ५१ स्तृतसंहरति द्विप्रं पुनः सृजति हंति च जगंति वहुपर्यायैः काल एव कुतूहली ५२ न
निग्रहग्रहः कश्चिन्नास्त्रे कश्चिन्न कश्चन जंतुस्त्व भ्यवहार्येषु प्राक्रम्य कालभोगिनः ५३ काकयामर्द
पिंडानां निमेषांतरवासिनां अपि देवनिकायाये ते पिंडुः कालगोन्वरा ५४

५१ कुतूहलीक्रीडाकौतुकी ५२ स्वशरीरादेः सर्वप्राणिशरीरादिव कालाशपला यदीयमन्नं तेन तदवश्यं
भोक्तव्यमेवेति निश्चिस तत्राहं ताद्यभिमानत्यागेन शोकप्रसक्तिरिसाशयेनाह नविशेषेति ग्रहः दर्शनं नक
श्चित्ताद्विषयो विशेषः धर्मः नकश्चन धर्मत्वेन प्रसिद्ध इत्यर्थः कालल क्षणस्यभोगिनः सर्पस्य प्राक्रम्य व

रामः
३८४

गुरुशास्त्रयोः शिष्यबोधनशक्तिः शिष्यस्य च चित्तशुद्ध्याऊहापोहकुशलतया बोद्धृताशक्तिः रागादीनां च तमू
लोच्छेदयोग्यता प्राक्तनाखिलकर्मणः परिपाक इति सर्वसामग्रीमिलनमपीश्वरेच्छालक्षणं निपतति यस्मादेवं तस्मादाह क्वेति
वाङ्मनसागम्यपाः अखंडब्रह्मात्मचितः वक्ता गुरुः क्व शिष्यस्य च तद्बोधयोग्यता लक्षणं वैदग्ध्यं कौशलं
क्व इयं एवं शमदमादिक्रमेणास्य विनाशाय परिणतामोहवल्लरी क्व यस्याः सकाशादियं सर्वसामग्रीद्वंद्वपरस्प
रमिलनमागता तत्रापि निपतति ईश्वरेच्छा अचिंतनीया प्रभावेषता परिच्छेदेन चिंत पितुमशक्येत्यर्थः ४१ अतएव
दृशसामग्रीप्राप्तिमोहजयोस्ताह एवमुक्तोनलतया लेशोक इत्याह हे भरद्वाजेति असामान्यमसाधारणं ४२ किं
क्वचिदुक्ताक्व वैदग्ध्यं क्व वेयं मोहवल्लरी अचिंतनीया निपतति यदियं द्वंद्वमाहिता ४१ हे भरद्वाज मोहं त्वं
विवेके नपरिस्फुटं असामान्यमिदानीं त्वं ज्ञानं प्राप्स्यस्यसंशयं ४२ दूरं मुत्सहते राजा महासत्वो महापदि
अल्पसत्वो जनः शोकं त्वल्पेपि हि परिह्वते ४३ बोधः पुण्यपराधीनः प्रयत्ने बहुजन्मभिः अनुमीयेत धीरै
सुजीवन्मुक्तेषु कार्यतः ४४ द्विधमदूतेनयेनैव कर्मणावधई हशः सहदूतेन तेनैव मोक्षमाप्स्यसि पुत्र
क ४५ सतां सत्कर्मसंवेगः पुण्याणां प्राणदन्वयं वयो पिइव भूता नां दवा नलमसेन्धपत्त ४६
चमहत्सपि कार्ये शोकः सामग्रीहीनस्य युक्तो न तु महाराज्यस्येव सर्वसामग्रीसंपन्नस्य तवेत्याशयेनाह दूरमिति
॥ महासत्वो राजा पृथ्व्यादि महापदि निमग्नोपि वनाश्यत्वादि सामग्रीसंपन्नत्वादन्येषां मनोरथमपि दुष्प्रापालन
दुष्टनिग्रहशिष्टपरिपालनादिकार्यमाज्ञामात्रेण कर्तुमुत्सहते परि ह्वीतो धनादिदातृरूपायामापदि तद्वत्त
रणधैर्यादिसामग्रीविरहादित्यर्थः ४३ जीवन्मुक्तानि दर्शनीकृतपुण्यसामग्र्यास्त्वां मम बोधो भविष्यत्ये
वेत्यनुपायसोत्साहं पुण्यसामग्र्यर्जने प्रयत्नं प्रवर्त्तितया प्रायेणाह बोध इति ४४ ननु पापवत्पुण्यस्यापि
बंधकत्वाद्विषमदूतं पुण्यं कथमर्जनीयं तत्राह विषमदूतेनेति सति रागे पुण्यं बंधकं तदभावे तु

प्रश्नाभिप्रायानुरूपमुत्तरं वक्तुं प्रतिजानीते श्रुतिशासनात् मांडूक्योपनिषदादिश्रुत्युक्तक्रमात् ३ विश्व
कलितो कृत्स्नमतिभिः स्वयमेव पूर्वापरविचारेण निकृष्टज्ञानेन शक्यं ततः सोऽबुधः प्राक्प्रख्यातमिदानीं
कथंनष्ट इति वद्यमाणग्रहणाद्वधालार्थमभिक्षिपति पूर्वापरेति ३४ इतिश्रीवासिष्ठतात्पर्यप्रकाशेनि
र्वाणप्रकरणे सप्तविंशत्युत्तरशततमः सर्गः १२७ ॥ प्रविलापनयुक्त्यालभरद्वाजकृताध्यता वार्पे तेज्ञा
निकत्वमुपरामसुस्थापनक्रमाः तत्र सांगोपांगाध्याकारांतं प्रपंचप्रविशांतो दांतउपरतस्तितिक्षुः श्रद्धान्वि
तः समाहितो भूत्वा आत्मन्येवात्मानं पश्यतीति श्रुति तात्पर्यवर्णनमुखेनैव वक्तुमारभते शांत इत्यादिना तत्रे

384 त्थं प्रपंचविलये यथा नलंप्रकाशते तथोपायप्रवक्ष्यामि संक्षेपात् श्रुतिशासनात् ३ पूर्वापरविचा
रहीकथं नष्टा तव स्मृतिः तथैव ज्ञापते सर्वं करामलकवत्स्वयं ३४ इतिश्रीवासिष्ठेमोक्षोपायेभरद्वा
जानुशासनं सप्तविंशत्युत्तरशततमः सर्गः ॥ श्रीवाल्मीकिरुवाच ॥ शांतो दांत उपरतो निषिद्धात्का
म्यकर्मणः विषयेंद्रियसंश्लेषस्तु रतश्च श्रद्धयान्वितः १ स्वस्वासने समासीनो जितचित्तेंद्रि
यक्रियः ओमित्युच्चारयेत्तावत्मनो यावत्प्रसीदति २ प्राणायामं ततः कुर्याद्रंतःकरणशुद्धये इंद्रिया
ण्याहरेत्पश्चाद्विषयेभ्यः शनैः शनैः ३ देहेंद्रियमनोबुद्धिदोत्रज्ञानां च संभवः यस्माद्भवति तत्स्वाला
ते सुयथ्याद्विलापयेत् ४

परतपदं विषयविभागेन व्याचष्टे निषिद्धादिति १ तत्र समाहितपदार्थतया स्वासनाद्यष्टांगयोगं वर्ण
यति तत्र पदमर्थाख्याचष्टे स्वासने इत्यादिना उच्चारयेत् दीर्घं जपेत् भुशुंडोपाख्यानोक्तरीत्या मुत रामः
नमामितिवा २ ३ यस्माद्यस्माद्यस्ययस्य संभवो जन्म भवति तत्तत्कालाशुसादिना स्वलातेषु भूतेषु ३८५
देवेषु च विलापयेत् वाचारंभण श्रुत्युक्तरीत्या तत्व्यतिरेकेण नास्तीति स्मरेदित्यर्थः ४ रामः

अपि च मा हिणस्तव संसारवर्तिनः कौतुदर्शनमेव युक्तं नतु शोकमोहादिविकारैः स्वयं नर्तनमित्याह स्वयमिति विपत्तौ व
नविच्छादिना शोषकलानि विवेकदर्शनासमर्थानि रोदनादिविकृतानि च इन्द्रियाणि च यस्य रादीनि यस्य तथाविधः सन् ५५ स
णभंगिनः दर्शनादिति शोषः मनस्वी विवेकी ५६ अमंगलस्य मर्म गलाहं ५७ कानि मंगलानि तान्याह देवेति देवद्विजादिग्र
हाः प्रभृतयः ईश्वरानुग्रहसाधनत्वात्मंगलानि ईश्वरानुग्रहस्तु साक्षाद्बानसाधनत्वात्प्रथमं मंगलमिति भावः तथा चोक्तं
ईश्वरानुग्रहादेव पुंसामद्वैतवासना महाभयपरित्राणं द्विजाणामेव जायते इति ५८ इदानीं भरद्वाजः सर्वसाधनरहस्यं

स्वपंन्नसि किंश्रीतो विपत्तौ विकलेंद्रियः क्षणंनिश्चलमासीनः पश्यसंसारनाटकं ५५ अस्मानेकतरंगस्य ज
गतः क्षणभंगिनः नविषीदतिमनस्वी भरद्वाजमनागपि ५६ त्यजशोकममंगलंमंगलानि विचिंतय चि
दानंदघनं स्वच्छमात्मानं च विभावय ५७ देवद्विजगुरुप्राज्ञाभरवंधुस्वचेतसा सदागमप्रमाणानां महे
शानुग्रहो भवेत् ५८ भरद्वाज उवाच ॥ ज्ञातं तव प्रसादेन सर्वमेतद्दशेषतः नवैराग्यात्परो वंधुर्नसंसारात्
परो रिपुः ५९ इदानीं श्रोतुमिच्छामि वशिष्ठेनोपपादितं ज्ञानसारमशेषेण ग्रंथेनोक्तं पदात्मना ६० श्रीवा
ल्मीकिरुवाच ॥ भरद्वाज शृणुष्वेदं महाज्ञानं विमुक्तिदं यस्य श्रवणमात्रेण भवाब्धौ न निमज्जसि ६१
संहृति स्थिति संभूति भेदैर्योनेकदा स्थितः एकोपि सन्नमस्तस्मै सच्चिदानंदमूर्तये ६२

मया पिंडीकृत्याज्ञातं दृश्यप्रपंचप्रविलापनोपायरहस्यं ईश्वरानुग्रहसाधनरहस्यं च वशिष्ठस्य वित्त
येति पुनिशाकलितं तत्र तत्रोक्तं पिंडीकृत्य न ज्ञातमिति कंठोक्त्या पौ स्वदर्शयितुं जिज्ञासुः पृच्छति ज्ञात
मित्याद्विना ५९ अनेकवाक्यात्मना अशेषेण ग्रंथेनोक्तं रहस्यं एकपदात्मना पिंडीकृत्य निष्कृष्य श्रोतु
मिच्छामीत्यर्थः पदात्मनेति पाठे पदस्तोयकेणेति ग्रंथविशेषणं ६० ६१ प्रविलापनोपायमपवादं व

इंद्रियव्यपदेशेन व्यादिश्यंते च देवताः ११

वा०टी०
नि०प्र०
३८३

ब्रह्मणि चलमुखे बुद्धिग्रहणमुपलक्षणं एवं मनोहंकारश्चित्तान्यपि चंद्ररुद्राच्युतेषु प्रविलापय इति
उपसंहरति एताइति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिश्रुतिवाक्यमागममनुसृत्य देवता एव इंद्रिय
व्यपदेशेन स्थिताः न त्विंद्रियाणि नाम वस्त्वंतराणि संतीति तल्लोपदेशेन प्रविलापनायमयाव्यादिश्यं
ते न स्वतः स्वकपोलकल्पनया एते ऽर्थाः प्रकटीकृता इत्युत्तरेणान्वयः ११ एवं देहेंद्रियसादि प्रविला
पन संग्रहश्लोकं विवृत्य निराजिज्ञ्यमस्थिलेऽसेतद्विशदयति एवमिति १२ आत्माकृते स्थितः पश्चादि
सेतादि वरणप्रसंगेन मायाशबलस्य सर्वजगदभिन्ननिमित्तोपादानस्य ब्रह्मणो ब्रह्मविद्यार्थिभिः उपा
स्यत्वेनोक्ता ब्रह्मांडात्मनो विराजो हृदयेऽसौ सदास्थिता ब्रह्मविद्याघटिताऽर्धशरीरा मूर्तिं दर्शयन्

बुद्धिं ब्रह्मणि संपक्षदेताः कारणदेवताः ११ श्रुतिवाक्यमनुसृत्य न स्वतः प्रकटीकृताः एवं न्य
स्यात्मनो देहं विराडस्मीति चिंतयेत् १२ ब्रह्मांडातः स्थितोऽपी सावर्धनारी स्वयंप्रभुः आधारः
सर्वभूतानां कारणं तदुदाहृतं १३ स पश्चात्कुक्षिस्तपोसौ जगद्धर्ता व्यवस्थितः द्विगुणांडाद्बहिः पृ
थ्वी पृथिव्या द्विगुणं जलं १४ सलिलाद्विगुणं तेजस्तेजसो द्विगुणोऽनिलः वायोर्द्विगुणमाका
शमूर्ध्वमेकैकशः क्रमात् १५

एवं सर्वप्राणिनां मातृपितृरूपेण कारणमित्याह ब्रह्मांडांत इति १३ सोऽसौ पितृत्वादेवस्वस्थस्य देवम
नुष्यादिजगतः कर्ता अन्नपानादिजीवनोपायेन व्यवस्थितः सन् हविर्वृष्ट्यादिना सर्वपोषकश्चेतस्मात्तप
स्तुष्टिरूपो ब्रह्मांडांतः स्थितः प्रासंगिकमुक्ता प्रस्तुतप्रविलापनं वक्तुं ब्रह्मांडावरणान्याह द्विगुणेति
यद्यपि एभिरावरणैरंडं व्याप्तं दशगुणेन तरतमरूपतेन तथापि द्विगुणमेव परितो वेष्टनेन पंचक्रोशप्रद
उत्तरोत्तरं १५

राम:
३८३

385

एवमध्यात्मिकदेहेन्द्रियादिभावं स्वकारणभूतसमष्ट्यात्मा अकाराद्वैवाहमस्मीति भावनया प्रथमं विराजि स्थि-
त्वात ततः परं तत्कारणेऽकारार्थे सूक्ष्मभूतलिंगसमष्ट्यात्महिरण्यगर्भे विराजं प्रविलाप्य स्थितात् तत्कारणे
त्रिगुणमायोपहिते मकारार्थे अव्याकृते स्थितः सन् ततः पश्चात् सर्वजगन्मूलकारणत्वोपलक्षितेऽव्याकृत
सर्वाधिष्ठाने अर्धमात्रालक्षिते शुद्धे ब्रह्मणि अव्याकृतमपि विलाप्य स्थितो भवेदित्यर्थः ४ देहेन्द्रियादिषु
पस्य यस्मात् संभवस्तत्तत्र प्रविलापनं यदुक्तं तद्विशिष्य पुनर्विवृणोति मांसादीत्यादिना द्वीपेत् तन्मात्रता

विराजि प्रपञ्चं स्थित्वा तन्मात्रमिति ततः परं अव्याकृते स्थितः पश्चात् स्थितः परमकारणे ४ मांसादि
पार्थिवं भागं पृथिव्यां प्रविलापयेत् अप्यं रक्तादिकं वा द्रवं तैजसं तेजसि क्षिपेत् ६ वायव्यं च म
हावायौ नाभसं नभसि क्षिपेत् पृथिव्यादिषु विन्यस्य चेन्द्रियाणि लयोनिषु ७ श्रोत्रादिलक्षणे
पेतां कर्तुर्भोगप्रसिद्धये दिक्षु न्यस्यात्मनः श्रोत्रं त्वचं विद्युति निक्षिपेत् ८ चक्षुरादित्यबिंबे
च जिह्वामप्सु विनिक्षिपेत् प्राणं वायौ वाचमग्नौ पाणिमिंद्रे विनिक्षिपेत् ९ विष्णौ तथात्मनः पा
दौ पायुं मित्रे तथैव च उपस्थं कश्यपे न्यस्य मनश्चन्द्रे निवेशयेत् १०

थिवं तेनेन प्रविलापयेत् ६ नाभसं शारीराकाशं एवं घ्राणादीन्द्रियाण्यपि स्वालयोनिषु स्वारंभकेषु देवतो
पाधिभूतसूक्ष्मपृथिव्यादिषु निक्षिप्य विलाप्य ७ दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नित्यादिश्रुतेः
कर्तुर्जीवस्य शब्दादिभोगप्रसिद्धये कार्यं दिग्जालकानुप्रवेशेन श्रोत्रादिलक्षणेनेन्द्रियभावेनो
पेतां दिगादिदेवतां यथाक्रमं देवतास्वेव निक्षिपेदित्यर्थः तदेव क्रमं दर्शयति दिक्ष्वित्यादिना ८ अ

वा०टी०
नि०पू०
३८७

अपरे बौद्धाः सत्कृतिस्तपाम विद्यां तत्र तस्मिन्नव्याकृते प्रलयकाले सर्वे पदार्थाः लयं गत्वा भावविकारं ग
त्वा अनभिव्यक्तरूपिणस्संतस्तत्सत्तयैव तिष्ठंति २२ कथं तिष्ठंतीत्याह निःसंबंधा इति परस्परसंसर्गशून्या
श्चिद्रूपतालक्षणास्वादशून्याश्चेत्यर्थः ततः प्रलयानंतरं सर्गकाले ततः अव्याकृतादेव प्रकृतिभूतान्न
२३ अनुलोम्यादाकाशादिक्रमात् प्रातिलोम्येन सृष्टिविपरीतक्रमेण पश्चात्स्थितः परमकारणे लीत
द्विगुणोतीत्यत इति स्थानत्रयं विराट् हिरण्यगर्भाव्याकृताख्यं स्थूलसूक्ष्मकारणरूपसमष्टिजाग्रदा
द्यवस्थात्रयं नांतःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनमिति श्रुतिः सुप्रदर्शितदिशाल
ज्ञातदधिष्ठाने परिशिष्टचिन्मात्रे कर्तसंग्रहरूपमव्यवहार्यमग्राह्यमलक्षणमचिंत्य मव्यपदेश्यमे

अविद्यामपरे प्राहुस्तां तां विभ्रान्तचेतसः तत्र सर्वे लयं गत्वा तिष्ठन्त्यव्यक्तरूपिणः २२ निःसंबंधानि
रावादाः संभवंति ततः पुनः तत्तत्स्वरूपाणि तिष्ठंति यावत्सृष्टिः प्रवर्तते २३ आनुलोम्या
त्सृष्टानां सृष्टिः प्रातिलोम्येन संहृतिः अतः स्थानत्रयं सत्त्वात्तुरीयपदमव्ययं २४ ध्यायेत्तस्य स्वरूपे
लिंगं प्रविलाप्य परं विशेत् भूतेंद्रियमनोबुद्धिवासनाकर्मवायवः २५

कालं प्रलयसारं प्रपंचोपशमं शिवं शांतमद्वैतं चतुर्थं मन्यंते इति श्रुतिप्रदर्शितं तत्सप्राप्तये साक्षात्का
रक्षमध्यानकर्तृरूपं लिंगमपि मूलाज्ञानबाधेन प्रविलाप्य घटभंगे घटाकाशो महाकाशमिव प
रं निरतिशयानंदं ब्रह्म साक्षात्कालाभाविधेध्यायेत् ध्यानेद्रूपाचरत्वसाक्षात्कारक्षमध्यानकर्तृक
रणरूपं लिंगमपि मूलाज्ञानबाधेन प्रविलाप्य घटभंगे घटाकाशो महाकाशमिव परं निरतिशयानंदं
ब्रह्म विशेत् तेवासलिंगनिगडमुक्तया कृतार्थतेत्यर्थः ननु नांतःप्रज्ञमित्यादिश्रुतौ लिंगबाधो न दृश्य
ते तत्कथं तल्लिंगबाधेति रीतिचेत् स्थानत्रयबाधे लिंगबाधो पि सिद्धः स्थूलसूक्ष्मभूतेंद्रियादिष्वेव लिंग

सर्ग ४
श्लो० ३८७

मस्तेन अपंचीकृतेन समस्तेन पंचीकृतेन अत एवांतरमांतरं बाह्ये प्रविलापयेदित्याह क्षितिमिति १६ समावेश्य
प्रविलाप्य महदाकाशे समस्त [illegible] स्थूलप्रपंचोत्पत्तिकारणे हिरण्यगर्भाकाशे १७ किं तल्लिंगशरीरं तदाह
वासनाइति १८ लिंगं लिंगशरीरं एवं स्थूलोपाधिप्रविलाप [illegible] नेनाद्धंइ वसपन्नः ब्रह्मांडलिंताभिमानत्या
गात्ततो वहिर्भूतः सन् तत्र भूतसूक्ष्म [illegible] भूतात्मकलिंगसमष्टिदेहे अहमालाअभिमानी हिरण्यगर्भोवास्मी
ति चिंतयेदित्यर्थः १९ ननु चतुर्मुखः पद्मसंभवो देहो लोके हिरण्यगर्भ इति प्रसिद्धः अयं तु भूतसूक्ष्मस
मष्ट्यात्मा न चतुर्मुख इत्यत आह हिरण्यगर्भस्तदाह चतुर्मुख इति भूतसूक्ष्मो अभिमानित्वाद्व्यव

व्यस्तेन च समस्तेन व्याप्तिना अपि तं जगत् क्षितिं चाप्सु समावेश्य सलिलं चानले क्षिपेत् १६ अग्निं
वायौ समावेश्य वायुं च नभसि क्षिपेत् नभश्च महदाकाशे समस्तोत्पत्तिकारणे १७ स्थिरतां तस्मिँल्लयं
योगी लिंगमात्रशरीरधृक् वासनाभूतसूक्ष्मांश्च कर्मविद्ये तथैव च १८ दशेंद्रियमनोबुद्धिरेतल्लिं
गं विदुर्बुधाः ततोऽहं ब्रह्मांडदेहे यतिस्तत्रास्मीति चिंतयेत् १९ चतुर्मुखोऽग्रके चायं भूतसूक्ष्मव्यवस्थि
तः लिंगमव्याकृते सूक्ष्मे न्यस्याव्याकृते च बुद्धिमान् २० नामरूपविनिर्मुक्तं यस्मिन् संतिष्ठते जगत्
तमाहुः प्रकृतिं केचिन्मायामेके परे त्वणून् २१

स्थितोयमेव अग्रके ब्रह्मांडप्रविलापनात्पूर्वं ब्रह्मांडैश्वर्यभोगार्थं पद्मोद्भवं देहं कल्पयित्वा चतुर्मुख
आसीदित्यर्थः ईदृशो हिरण्यगर्भत्वभावनानंतरं यत्कर्तव्यं तदाह लिंगमिति अपंचीकृतभूतसूक्ष्मेति
सूक्ष्मो[illegible] आकारेणाव्याकृते मायायां पाहि तच्चिदाकारेण मनोच जडाशास्य जडे [illegible] भासोशास
वितिप्रविलापनमिति सूचनाय द्विधा उक्तिः २० अथवाव्याकरणफलमभिव्यक्तिरिति क्रियापक

उे २

न्यस्तं प्रविलापितं ३१ उपाधिनाशो ऽपहित जीव विनाशः शंकापि मे गते त्याशयेनाह अविनष्ट इति चेत
ने चिदेकरसे सति ब्रह्मणि ३२ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनमित्यादिश्लोकाः चित्स्वानुभवं स
पादयति नित्यमित्यादिना ३४ ३५ सत्यसंकल्पमात्रेण मत्तोपि जगतः सत्तासंपादनसमर्थसद्रूपं ३६
सत्वादिभिर्मायागुणैर्वर्जितं ३७ अभ्यासकाले विलयान्प्रस्वेव ध्यानं महत्वमुपदिष्टमित्याशयेना

अचेतनं जगत्न्यस्तं चेतन्ये चेतनाभवेत् यथा वैलवयां ग्रंथिः समुद्रसैंधवो यथा ३१ नामरूप
विनिर्मुक्तं प्रविष्टं पेतिसमुद्रतां यथा गले जलं न्यस्तं क्षीरे क्षीरं घृते घृतं ३२ आविनष्टाभवत्सैव
अविशेषतः तथाह सर्वभावेन प्रविष्टश्चेतनेसति ३३ नित्यानंदे समस्तज्ञे परे परमकार
णे नित्यं सर्वगतं शांतं निरवद्यं निरंजनं ३४ निष्कलं निष्क्रियं शुद्धं तद्ब्रह्मास्मि परं पदं
हेयोपादेयनिर्मुक्तं सत्यरूपं निरीन्द्रियं ३५ केवलं सत्यसंकल्पं शुद्धं ब्रह्मास्म्यहं परं पुण्यपाप
विनिर्मुक्तं कारणं जगतः परं ३६ अद्वितीयं परं ज्योति ब्रह्मास्म्यानंदमव्ययं एवमादिर्गुणैर्युक्तं सत्वा
दिगुणवर्जितं ३७ प्रविष्टं सकलं ब्रह्म सदाभ्यासे स्वकर्मकृत् एवमभ्यसतः पुंसो मनोस्तं प्रयाति
त्वै ३८ मनस्यस्तं गते तस्य स्वरूपमात्मा प्रकाशते प्रकाशे सर्वदुःखानां हानिः स्यात्स्वमात्मनि
३९ स्वयमेवात्मना त्मानमानंदं प्रतिपद्यते न सतोस्य परः कश्चिच्चिदानंदमयः प्रभुः ४० अहमेकः
कि १ परंब्रह्म दृष्ट्वा त्मा तत्प्रकाशते श्रीवाल्मीकिरुवाच ॥ सर्वे संन्यस्य कर्माणि ब्रह्मण्यःरण्यी भव ४१

ह प्रविष्टमित्यादिना स्तु कर्मकृत् श्रवण गुरुशुश्रूषादिपरः स्ववर्णाश्रमधर्मनिष्ठश्च ३८ ३९ कथं प्र
तिपद्यते तदाह न मत्त इति ४० प्रतिपत्तिशब्दार्थमाह इत्यालोत्ति एवं भरद्वाजोक्तमनुभवं निशम्य सं... ल
ष्टो वाल्मीकिस्तदुत्तमनुभवस्थैर्यायत्यजतैवै दितद्वदेयसकृत्प्रत्यक्परपदमित्यादिश्लोकान्तिसिद्धसंसा

3<8>7

नन्वज्ञानं कथं प्रतिष्ठातत्राह लिंगमिति सुक्षेत्र अज्ञानावरणेनाव्याकृतेहि सति स्थूल तद्द्वारा लिंगमुत्पद्यते नाज्ञा
नं विनेति देवलिंगस्य मूलप्रतिष्ठिति तन्निवृत्तौ लिंगनिगडभंगसिद्धिरिति भावः एवं वाल्मीकिनाब्रह्मणा
पंचप्रपंचनीपायेन प्रतिबोधितः प्रबुद्धो भरद्वाजः स्वानुभवं गुर्वनुभवसंवादेन परीक्षणाय प्रकाशयन्नुवा
च इदानीमित्यादिना २६ २७ चिद्रूहं न लिप्ये … कीदृशाद्भेदपरमात्मास्तित्राह घटोभाव
ति घटभंगे सतीत्यर्थः यथा एकस्यैव घटस्य घटकलशनामभेदकल्पनात्तदुपहिते आकाशेपि घटाका
शः कलशाकाश इति व्यपदेशभेद कल्पनात द्वदेकस्यैवाज्ञानस्य जगन्नामभेदकल्पनात्तदुप
हितेचमपि जीव ईश्वरः देवो नरः कुंजर इत्यादि व्यपदेशभेदकल्पना चासीत् तत्रैकेन घटभंगेन यथोड.

अज्ञानं च प्रतिष्ठास्य लिंगमव्याकृते सति ॥भरद्वाज उवाच॥ इदानीं लिंगनिगडान्मुक्तोहं सर्वथाप
तः २६ चिद्दशालास्वविष्टोहं चैतन्यानंदसागरे अभेदात्परमात्मास्मि सर्वोपाधिविवर्जितः २७
कूटस्थः केवलो व्यापी चिद्रूपोहं कीदृशान्नहि घटाभावे घटाकाशः कलशाकाशयोर्यथा २८ त
मातुः श्रुतयो वह्न्य एकमेवैक्यमादरात् यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत् २९ त
दात्म्यस्तन्मयो भूत्वा गच्छन्ति न विशेषतः यथा लवणं दिक्षु क्षिप्तं समापां लवणं भवेत् ३०

मपनिवृत्तावस्तु घटाकाशकलशाकाशयोस्तद्वदेकस्यात्मानस्य निवृत्य सर्वनामादिभेद निवृत्या चिदेकरसा
भासप्पामित्यर्थः २८ एवमैक्यमभिप्रेत्य तद्ब्रह्मभूतमात्मा यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजाना
ति स भूमा आपन्नत्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् एकात्मप्रत्ययसारं प्रपंचोपशमं शान्तमद्वैतं चतुर्थं
मन्यन्ते नेह नास्ति किंचनेत्यादयो वह्न्यः श्रुतयः आहुरित्यर्थः एवं यथा जलं जले हीनं दीयते
छतं अविशेषो भवेत् तद्वज्जीवात्मापरमात्मनीत्यादि श्रुतिभिरिहैक्यमेवैक्यं दर्शितमित्याशयेनो

वा०टी० निःसू० ३८९

एवं पृष्टो वाल्मीकिस्त्वपाद्यथमं काम्य  निषिद्ध कर्मणां ज्ञानविरोधित्वे पादिदोषसहेतुभूत कर्मणां च सा
ज्ञानज्ञानित्वं शास्त्राभ्यासे न संपादनीयं तदुत्तरं तस्य कर्म कीदृशमिति तत्प्रश्नोत्तरत्वं स्वयमेवज्ञास्यासि तत्तद्
मिकापरिपाकक्रमेण तत्त्कर्मोपरमस्य तदा तदेवत्वयानुभवितुं शक्यत्वात् ज्ञानिनां च प्रारब्ध वैचित्र्येण
कारुपस्थितत्वदर्शनेन तत्कर्मणां प्रवृत्तमेव वेति निष्फलमशक्यत्वादित्याशयेनोत्तरमाह तस्मादिति तस्मा
त्सर्वकर्मसंन्याससहित  ब्रह्मप्राप्तित्वमेव संसारभ्रमनिवर्तक ज्ञानोपाय इति मदुपदिष्टार्थस्य युक्तत्वात्
त्वादृशैर्मुमुक्षुभिर्यत्नपूर्वकं कर्मणां कृते सति श्रवणादिविघ्नदोषश्रुतविद्वेषमालिन्यपातकादिदोष
श्रवणभवतितदेव कर्तव्यं काम्यनिषिद्धं च कार्यं दृष्टविघ्नापसाधनं च कर्म न कर्तव्यमित्यर्थः विविदिषासं
न्यासपरिपालनं तु विधिना त्यक्तस्य पुनर्विधिं विना परिग्रहासंभवादाकृत्यं नैष्ठिकं धर्मं परत्व प्रच्यवते

वा० अकृतं वानिकृत्तं वा कर्तव्यं च न वा प्रभो॥ वाल्मीकिरुवाच॥ तस्माद्यत्नकृते दोषत्वत् कर्तव्यं मुमुक्षुभिः
४४ काम्यं कर्म निषिद्धं च न कर्तव्यं विशेषतः यदा ब्रह्मगुणैर्जीवो युक्त  स्त्यक्तमनोगुणैः ४५ संशा
388 न्तकरणग्रामस्तदास्यात्सर्वगः प्रभुः देहेंद्रियमनोबुद्धेः परस्तस्मात्स्वयं परः ४६ सोहमस्मि यदा ध्याये
तदा जीवो विमुच्यते कर्तृभोक्त्रादिनिर्मुक्तः सर्वोपाधिविवर्जितः ४७

 पुनः प्राप्तप्रवृत्तं न पश्यामि येन शुद्धे सत्त्वग्रामहेत्वादि प्राक्तत्वदोषश्रवणात्पुनः परिग्रहे प्रयोज
नाभावाच्छिष्टविगर्हितत्वाच्च सेत्स्यतीति भावः ४४ ज्ञानित्वस्य सर्वमनोगुणत्यागेन पूर्णानंदाद्वयविष्णु
ज्ञानसंगविदेकरसत्वादि ब्रह्मगुणप्राप्तावेवसानत्वान्पष्टत्वमाह यदेत्यादिना ४५ देहादिकोशान्वतत्वदृष्टा
सत्त्वानंदमयकोशात्मतस्मात्परस्तदधिष्ठानं ब्रह्म ४६ आदिपदात्कर्तृकार्यं करणं भोक्ता भोग्यभो
गः ज्ञाता ज्ञानं ज्ञेयमिति त्रिपुट्यः परिगृह्यंते तत्प्रयोजकैः सर्वैर्देहाद्युपाधिभिस्तत्कलाभ्यां



रामः ३८९

संसारचक्रावर्ते भुभ्रमती तिभ्रमः त्वंयदिशामेविश्रांतिमुरवंगार्हस्थ्येनेव्यसनप्राप्नोतीर्हि कर्माणिसंन्यस्यब्रह्म
णः प्रणपीब्रह्मणपे ननिर्वेदोपमास्तेत्तोभव ब्रह्मसंस्थोपिगभूततत्वमेतीतिश्रुतेनरन्यव्यापारतपाब्रह्म
णपासक्तस्यसंन्यासिनुएवसर्वबीजभ्रांतिशांतिसंभवादितार्थः सर्वसमग्रंसांगमित्तिपावत् ४२ नविलंवते न
विरंस्यास्यतितस्पतावदेव चिरंयावन्नविमोक्ष्येअथसंपत्स्यइतिश्रुतेरितिभावः ज्ञानिनः जीवन्मुक्तस्यकर्म
कर्तव्यंनवेतिप्रथमः प्रश्नः पद्यकर्तव्यंतदाप्रकृतित्वंनिलनेमित्तिककाम्यकर्मसर्वमेव यथाहू वेंक
तव्यं अथवाकामनाभ्योनकृतस्वस्वाश्रमोचितंकर्ममात्रंकर्तव्यमितिद्वितीयप्रश्नः पाठक्रमादार्थक्रमस्य
बलीयस्त्वाद्बोध्यः ननुसर्वेन्यस्यकर्माणिब्रह्मणः प्रणपीभवेतिसर्वकर्मसंन्यासंश्रुत्वातोभरद्वाजस्यद्वाव

नेभ्यसेयदिसंसारचक्रावर्तभ्रमः शमं भरद्वाजउवाच॥ त्वयोक्तंसर्वमेवेदज्ञानंबुद्धंमयागुरो ४२
बुद्धिश्चनिर्मलाजातासंसारोनविलंवतो इदानींत्वमिदंमिज्ञानिनः कर्मकीदृशं ४३ नीर२

निबद्ध

पिप्रश्नावनुपपन्नोसत्यं तथापियावज्जीवमग्निहोत्रंजुहोतिकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाःइत्या
दिश्रुतिभिर्यावज्जीवंकर्तव्यतयाविद्धानांदीक्षितोनददातिनजुहोतीत्यादिवाक्यैदीक्षाकालेसन्न्यासा
मपिदीक्षापगमेपुनः परिग्रहवत्त्यजतेवहितरेयं एतमेवप्रव्राजिनोलोकमिच्छंतः प्रव्रजंतिइत्यादिश्रु
तिभिर्ब्रह्मजिज्ञासानिमित्तेनत्यक्तानामग्नीनामिष्टानिमिज्ञागमेपुनः परिग्रहोन्यायसिद्धनचविहतसंन्या
सविधानात्पुनरपरिग्रहः तस्यजन्मांतरानुष्ठितविविदिषासंन्यासवशाज्जन्हस्थाश्रमेव्वेवतत्वज्ञानोद
येनकृतार्थोन्मुरूपविशेषान्प्रतिअप्राप्तसंन्यासांतरविधानरस्यप्राप्तविविदिषासंन्यासपरिपालनविधा

५८ महात्मनाः अपरिच्छिन्नब्रह्माकारवृत्तिो रामः ५९ अनुग्रहदृष्टिमात्रप्रयुक्तेन प्रागुक्तशक्तिपातेन त्वया
शिष्यस्य ब्रह्मीकरणं स्वस्य गुरुत्व शिष्योद्धारसामर्थ्यलक्षणं तल्लक्षणं त्वय्येव दर्शितमस्मभ्यमित्यर्थः ६०
ननु मया स्वशरीरं त्यक्त्वा रामदेहं प्रविश्य कुण्डलिनीसंचारादिकं न कृतमेव तत्कथं त्वया शक्तिपातो ज्ञानस्तत्रा
ह सत्यसंकल्पानां त्वादृशां कृपादृष्ट्यापि सच्छिष्यस्य कुण्डलिन्याः षट्चक्रभेदेन ब्रह्मरन्ध्रस्थितपरशिव
समावेशलक्षणो जीवस्योपाधिपरित्यागेन शुद्धब्रह्मसमावेशलक्षणश्च शक्तिपातः सिध्यतीति भावः ६१

इति ज्ञात्वाहमप्येवमभ्यासार्थं यते यथा तथैव व्यवहारोऽपि मुख्यो नैमे भविष्यति ५८ **श्रीवाल्मीकिरुवाच॥** यदा परिणतः साधुः स्वस्वरूपे महामनाः विश्वामित्रस्तदोवाच वसिष्ठं मुनिसत्तमं ५९ **श्रीविश्वामित्र उवाच॥** हे वशिष्ठ महाभाग ब्रह्मपुत्र महानसि गुरुत्वं शक्तिपातेन तत्क्षणादेव दर्शितं ६० दर्शनात्स्पर्शनाच्छब्दात्कृपया शिष्यदेहके जनयेद्यः समावेशं शाम्भवं स हि देशिकः ६१ रामोऽप्ययं विशुद्धात्मा विरक्तः स्वात्मनैव हि विश्रान्तिमात्राकाङ्क्षी च संवादात्प्राप्तवान्पदं ६२ शिष्यप्रज्ञैव बोधस्य कारणं गुरुवाक्यतः मलत्रयमपक्वं चेन्नैव कथं बुध्यति पक्ववान् ६३ ज्ञानं प्रसन्नमेवेदं गुरुशिष्यप्रयोजनं उभावपि यतो योग्यौ सर्वेषामीदृशामपि ६४ इदानीं कृपया रामस्तु स्यानं कर्तुमिहार्हसि यदेव परिणतस्त्वं हि कापि विश्रावयं पतः ६५

को गुरुः ६१ तत्र रामस्य सच्छिष्यतां दर्शयति राम इति ६२ मलत्रयं शैवशास्त्रप्रसिद्धमाणवादि का
मकर्मवासनालक्षणं वा कथं बुध्यति शिष्य इति शेषः ६३ संक्षेपेषु शास्त्रस्य हृष्टफलत्वे वसाहङ्का
नमिति यतः उभौ गुरुशिष्यौ योग्यौ च सर्वेषां गुरुशिष्याणामीदृशां कैवल्यलक्षणमपि भाजनं त्ता

४८ ४९ जाग्रत्स्वप्नावस्थयोर्बीजं सवासनाकर्माज्ञानं निद्रा तदवस्थाविशेषः ५० सेयं तुर्याख्या जीवस्य स्थितिर्योगिस्य
निदिध्यासनपरिपाकजन्यनिर्विकल्पसमाधेः वा शब्दात् मुख्याधिकारिणो विचारमात्रजन्यसाक्षात्कारज्ञान
स्य वा निष्ठापरिसमाप्तिः ५१ तस्मिन्विश्रान्तस्य तत्वद्वैतदर्शने प्रसक्तिरेव नास्ति दूरे कर्मद्वारवीचिमज्जनप्रसक्तिरि
त्याशयेनाह अपश्यन्तेति ५२ आगुक्तमीश्वरउपान्त्य तत्प्रसादात्तु वसिष्ठोक्त ज्ञानमार्गेणैवात्मज्ञाने सति एकवि

सुखदुःखविनिर्मुक्त इदानीं त्वं विमुच्यते सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ४८ यदा पश्यसि भे
देन तदा जीवो विमुच्यते जाग्रत्स्वप्नसुषुप्त्याख्यं हत्वा स्थानत्रयं यदा ४९ विशे तुरीयमानंदं तदा जीवो दा२
विमुच्यते जीवस्य चतुरीयाख्या स्थितिर्या परमात्मनि ५० अवस्था बीजनिद्रादिनिर्मुक्ता चित्स्व
रूपात्मिका योगस्य सेयं वा निष्ठा स्वसंवेदनं महत् ५१ मनस्यस्तंगते पुंसां तदन्यत्रोपलभ्यते प्रशा किं५
न्तामृतकल्लोले केवलामृतवारिधौ ५२ मज्ज मज्जासि देवेत गृह द्वाराब्धिवीचिषु मज्ज संभरिताभोगं
परमेशं जगद्गुरुं ५३ इति ते वर्णितं सर्वं वसिष्ठस्योपदेशनं अनेन ज्ञानमार्गेण योगमार्गेण पुत्रक
५४ भरद्वाज महाप्राज्ञ सर्वज्ञास्य सि निश्चितं परात्मेनि शास्त्रं शृणु गुरुवाक्यार्थबोधनात् ५५ अभ्या
सात्सर्वसिद्धिः स्यादिति वेदानुशासनं तस्मात्त्वं सर्वमुत्सृज्य कुर्वभ्यासे स्थिरं मनः॥भरद्वाज उवाच॥
रामः प्राप्तः परं योगं स्वात्मनात्मनि हे मुने कथं वसिष्ठदेवेन व्यवहारपरः कृतः ५७

ज्ञातेन सर्वविज्ञानात्सर्वसंशयमूलाज्ञाननाशाच्च सर्वसंशयोच्छेदेन विश्रान्तिर्भविष्यतीत्युपसंहरति मज्जेत्या
दिना ५३ ५४ तत्र शास्त्राचार्योपदेशस्वानुभवानामेकार्थ्ये निश्चलानिश्चयापत्त्यर्थं चिन्तनाख्यतिलक्षणः प
रामर्शः शब्दघोषणोक्तिलक्षणोऽभ्यासः अवश्यंकार्य इत्याह परामर्शेनेति ५५ ५६ उपाधित्यागेनैकं
स्वात्मना योधितप्रतीवा आत्मनि ब्रह्मणि ५७

ज्ञानकर्मसमुच्चयाधिकारिणं ब्रह्मलोकादिगतिं दर्शयितुं ज्ञानकर्मसमुच्चयौ च करिष्यतीति शेषः ज्ञा
नमंत्रोपासनं न केवलकर्म मार्गप्रवर्त्तिनं वेमानजनमात्रोपकारी किंतूत्तरकालमपि स्मरणकीर्त्ति
नस्वचरित्रप्रबोधनादिना स्वानुगतानां जीवन्मुक्तिरूपवरप्रदइत्याह पौरिति ७४ सर्वावस्थास्वगतानां
भक्त्याऽनुगतानां ७५ अनेन महात्मना रामचंद्रेण इति वर्णितप्रकारेण त्रैलोक्यस्यममापिहितंका
र्यमिति पूर्वेणालपः इदानीं श्रीविश्वामित्रः सामाजिकानां रामभक्तिं वर्द्धयन्नाह हे जनाः एतं यूयं च
सीतारामाय नमस्कुरुत तन्नमस्कारमात्रेण भवद्भिः सर्वं जेतव्यं जितमेव न साधनांतरम पेक्षणीयमित्य

भविष्यतिगतिर्द्दक् ज्ञानकर्मसमुच्चयौ येईष्टौ ये च तौ वापि ये ज्ञातौ बोधितस्ते पैः ७४ सर्वावस्था
गतानां तज्जीवन्मुक्तिं प्रदास्यति इति कार्यमशेषेण त्रैलोक्यस्य ममापि हि ७५ अनेन रामचंद्रेण
पुरुषेण महात्मना नमोस्मै जितमेवैतत्कोप्येवं चिरमेधतां ७६ श्रीवाल्मीकिरुवाच ॥ इतिश्रुत्वाचते
सर्वे विश्वामित्रेण भाषितं सिद्धाश्च वरयोगीन्द्रा वसिष्ठप्रमुखाः पुनः ७७ रामांघ्रिपद्मरजसा मादरस्मरणास्थि
ताः इत्यश्रुतोत्तरकथाः कथयामैथिलीपतेः ७८ न संतुतोष भगवान्वसिष्ठो न्ये महर्षयः गुणान्गुणानिधेस्तस्य भु
वनेनाकर्णयंश्रुतं विश्वामित्रस्तु निप्राह वसिष्ठोभगवान्विः ७९

थेः युस्माकं मध्ये कोपि पुरुष चौरयः एवंश्रीराम इव जीवन्मुक्तः स्थिरं निर्विकल्पसमाधिविश्रांतिं प्राप्तः सुखं स्थितांवह
तां ७६ ७७ दूराद्दुर्लभाश्रुता उत्तरचरित्ररूपा रामकथाये स्तथाविधास्सत रामांघ्रिपद्मरजसां आदरे रामनमस्कारे इ
तियावत् सदारास्मरणे च स्थिताः आस्थावंतो बभूवुरिति शेषः वसिष्ठः मैथिलीपतेः कथयाश्रुतया न संतुतोष
न तृप्तोबभूव ७८ एवमन्य महर्षयश्च न संतुतुषुः भूयश्चोत्कंठिताः सर्वे बभूवुरित्यर्थः अत एव ते तस्य गुणान्परोत्का
नाकर्णयस्वयं श्रुतं चान्यान्प्रतिब्रुवन्नब्रुवन्नस्मदभावे श्लोकादसः ७९ रामः॥ 

ममकार्यनिर्विघ्नपञ्चसिद्धिं त्वं स्मरन् रामम् उत्थापनं कर्तुम् अर्हसीति सूत्रेव क्ष्यामाकृपा इत्युत्तरत्र वा संबंधः
६६ किंचान्यदेवकार्यमपि राम मुत्थापनेन च रामसंपादयामो वयं ६७ कार्यं तत्राप्यपि दर्शयन् देवकार्यविश
दयति सिद्धाश्रमेत्यादिना अहल्यायाः मुक्तिं शापमोक्षं च कारिष्यतीत्यनुषंगः ६८ निस्त्रपो वाडिस्त्रयः
गतिं परलोकमार्गं ६९ राज्यं विमुच्य गतो विगतः जीवन्मुक्तत्वादेव अभयो निस्पृहश्च दंडकारण्यवासिनो
मुनीन् राक्षसवधेन भयादुद्धरिष्यतीति परेणान्वयः ७० विविधानि तीर्थानि प्राणिनश्चोद्धरिष्यति पाव
यिष्यतीत्यर्थः सीताहरणप्रयुक्तो यदीर्घस्य शोकमोहादिविडंबनं तच्छलेन रावणादीनां वधादपि सर्वेषां

स्मरन् कार्यं मम विभो यदुद्दिश्याहमागतः प्रार्थितश्चातिकष्टेन राज्ञा दशरथस्य वयं ६६ तद्दृष्ट्वा मा
कृथाः सर्वं प्रज्ञेन मनसा मुने देवकार्यं च रामान्म दवतारप्रयोजनं ६७ सिद्धाश्रम मया नीतो रा
मो राक्षसमर्दनं करिष्यति ततो हल्यामुक्तिं च जनकात्मजां ६८ परिणेष्यति कोदंडभंगेन कृत
निस्त्रपः रामस्य जामदग्न्यस्य कर्ता नष्टां गतिं ध्रुवं ६९ पित्रैव तामहे राज्यं विगतो भयनिःस्पृ
हेः वनवासच्छलेनेह दंडकारण्यवासिनः ७० उद्धरिष्यति तीर्थानि प्राणिनो विविधानि हि सी
ताहरणदीर्घत्वच्छलेन भुवि शोच्यत ७१ दर्शयिष्यति सर्वेषां रावणवधादपि स्त्रीसंगिनाम
पायस्वास्थ्यं यवानराद्दैः पराक्रतिः ७२ सीताविशुद्धिमन्विष्य लोकानुमतिमात्मनः जीवन्मुक्तो
निस्पृहोपि क्रियाकांडपरायणः ७३

स्त्रीसंगिनां भुवि शोच्यतां अस्वास्थ्यं च दर्शयिष्यतीति परेणान्वयः ७१ अयं इंद्रवरदानेन युद्धे मृ
तस्य वा नरवानरादेः परावृत्तिं परावर्तनं पुनः संजीवनं दर्शयिष्यति ७२ अग्निप्रवेशेन सीतां मन्विष्य
स्वात्मनः स्वस्य लोकानुमतिं शिष्टजनमाननीयत्वं चितां दर्शयिष्यति ततो रामराज्येऽभिषिक्तः स्व

जीवन्मुक्तो निस्पृहोपि सन् कर्माधिकृतजना
नां कर्मानुष्ठाने नैव गतिं इच्छु दर्शयितुं क्रियाकांडपरायणो भविष्यतीति परेणान्वयः ७३

११२

योगात्माप्याशङ्क्ति संभवात् मोहेनानाकृतत्वात्सदाजागरूकः ८८ यथाविक्रमेण पराक्रमेण अवश्यभावी विजयः जन्ये
नैप्राप्यते तेजसा यथा प्रकाशो भास्वरत्वं पञ्च प्राप्तिप्रियते यथा अकृतेन शास्त्रेण प्रज्ञोत्कर्षं ऊह्यते तद्वदयं सद्रूप
णेनगतह्तुनैवलभ्यः ८९ अमुना मार्गेण पाश्रितेन ममायं प्रतियोद्धेति चिंतिलश्रितनाहं संपन्नः ९० विद्गुदेहेना
मनाप्यन्यं स्वर्गं हित्वा स्वर्गस्यापि प्राच्यते लभ्यः अमित : परितः समयानि कथा हा प्रति योगे पीतिय ध्ये हितीया

अजोयज्ज्ञापतेयोगाजागरूकः सदा महान् विभर्ति भगवानेतद्धि स्वरूपो विश्वरूपवान् ८८ वि ज
यो विक्रमेणेव प्रकाश इव तेजसा प्रज्ञोत्कर्षः कृतेनेव स्वरूपेणायमूह्यते ८९ अयं दशरथोयन्यः स्व
तोयस्यपरः पुमान् अन्यः सदृश कंगेपि चिंतयाश्रितेन योमुना ९० हा स्वर्गममुनाप्यन्यं हापा ता
लादिहागतः तस्यागमादयं लोको मध्यमः श्रेष्ठतां गतः ९१ रामरूपवतीर्णोयमर्णवातः श्रीपः पुमान्
चिदानंदघनो रामः परमात्मायमव्ययः ९२ निरूढ़ीतेंद्रियग्रामा रामं जानंति योगिनः वयं त्ववरमेवास्य
रूपं रूपयितुं क्षमाः ९३ रघोरघोच्छेदको भगवानिति शुश्रुमः वशिष्ठरूपपालं हि व्यवहारपरं कुरु
९४ श्रीवाल्मीकिरुवाच ॥ इत्युक्त्वावस्थितस्तूष्णीं विश्वामित्रो महामुनिः वशिष्ठस्तु महातेजा रामचंद्र
मभाषत ९५ श्रीवशिष्ठउवाच ॥ राम राम महाबाहो महापुरुष चिन्मय नायं विश्रांतिकालो कानंदयो
भव ९६ यावल्लोकपरामर्शो निरूढो नास्ति योगिनः तावद्रूढसमाधित्वं न भवत्येव निर्मलं ९७

एवं शेषमूर्तिरपि पातालात्क्रमेणात्मना इहागतः तथा च पातालस्यापि श्रेष्ठ्यते दार्ष्यः ९१ ९२ रूपयितुं
निरूपयितुं द्रष्टुं च ९३ वंशेवतारेण द्युप्पनेन पावित इत्याह रघोरिति शुश्रुम इति क्रांनियमात्लेट् लिटि
मसोमादेशाभावश्छांदसः ९४ ९५ ९६ अधिकारिशरीरनिष्पादनलक्षणलोकानापरामर्शः पाव



दि२

बूहिश्रोत्वजनंप्रतिव्यक्तंवद अयंरामःजन्मनःप्राक्कःअभूत् किंवाबुधोद बः अथवा मनुष्यः इत्यज्ञ जनाभि
मायानुसारीप्रश्नः ८० विश्वामित्रोप्यज्ञजनानुसारेणोत्तरमाह अत्रैवेति हेजनलं अत्रास्मिन् रामएवसादाम्द
गवान्वासुदेवइतिविश्वासंकुरुसपुराणःपरपुरुषःसकः विश्वासार्थं मथितः अमोधिज्ञौराणवोयेनसःअं
भीराणांगूढाशयानामुपनिषदांतत्वतोगोचरः नान्यप्रमाणस्येत्यर्थः ८१ प्रदाता सर्वपुरुषार्थानामितिशेषः
स्तृदन्मत्तयाप्रसादितः ८२ असतः सतः कार्यतेकीर्त्यतेइति असन् सत्ताः मिथ्यार्थास्तान् ८३ मुक्रांताः विचा

श्रीवसिष्ठउवाच ॥ बूहि विश्वामित्रमुने रामोराजीवलोचनः कोयमभ्द्बुधः किंवामनुष्योवाधरा
घवः ८० विश्वामित्रउवाच ॥ अत्रैवकुरुविश्वासमयंसपुरुषःपरः विश्वोयंमथितांभोधिर्गंभीराग
मगोचरः ८१ परिपूर्ण पराानंदःसमःश्रीवत्सलांछनः सर्वेषांप्राणिनांरामः प्रदातात्वप्रसादितः
८२ अयंनिहंतिकुपितःस्व ज्यत्यमस त्सकान् विश्वादिर्विश्वजनकोधाताभर्त्ता महास्वरः ८३
अयंमुक्रांतनिःसारःस्व दुसंसारधूर्त्तकैः आनंदसिंधुर्वितत्तोवीतरागैर्विगाह्यते ८४ कचिन्मुक्त
इवालक्ष्यः क्वचिल्कर्यपदाभिधः क्वचित्प्रणीतप्रकृतिः क्वचित्स्थःपुमालयं अयंत्रयीमयोदेव
स्त्रैगुण्यवाहनातिगः जयत्यंगैरयंषड्भिर्वेदात्मापुरुषोद्भुतः ८६ अयंचलद्वाहुसंविश्वस्रष्टा
चतुर्मुखः अयमेवमहादेवःसंहर्त्ताचत्रिलोचनः ८७

रवाधिताः निःसाराःस्वद्वअकार्यकारणवंध्याऽपेस्तयाविधैः धूर्त्तकैर्जगद्वंचकैर्वीतरागैर्यतिभिरा
नंदसिंधुर्विगाह्यतेप्रविश्यते अयमेवज्ञानमुक्तोनित्यमुक्तोमायानियंतामायांतर्बद्धइवेतिचलक्ष्यी
स्थितइत्याह क्वचिदिति ८५ त्रयीमयीवेदशरीरः अंगैः शिक्षाकल्पादिभिःवेदानामालापारमार्थिकत्व

।.९
१०पू० तदनंतरं स्तुतिप्रागुक्तं रामराम महावाहो इत्यादि वसिष्ठवचनं पुनः सेने वश्राविंतं श्रुत्वा इदं गुरुवाक्यमनुलंध्यमितिपि
३९३ तृष्णाद्यबंधादि प्रार्थनामपि श्रुत्वा भगवान्सर्वज्ञः स्वावतारप्रयोजनमिइतियावत् तदेवमुपगमेन समाहितः प्रोवाचेत्य
र्थः १००।१२ विधिस्वरूपानुष्ठेयोर्थः तद्विपर्ययः स्मृतिक्रमणं तु निषेधः श्रुवरूप हेय इत्यर्थः १०३ इत्नो श्रीरामपरम
392 पुरुषार्थदानरूपस्य गुरुकृतोपकारस्य निष्कृतिमन्यामपश्यन् स्वशिरसि तच्चरणाधरणमेव जीनस्वं गुरवे समर्प्य
श्रुत्वा वसिष्ठवचनं गुरुवाक्यमितिस्वयं श्रुत्वा प्रोवाच भगवान् रामचंद्रः समाहितः १०१ श्रीराम उवाच नवि
धेर्न निषेधस्य त्वत्प्रसादादयं प्रभुः तथापि तव वाक्यं तु करणीयं हि सर्वदा १०२ वेदागम पुराणेषु स्मृतिष्वपि स
हामुने गुरुवाक्यं विधिः प्रोक्तो निषेधस्तद्विपर्ययः १०३ श्रीवाल्मिकिरुवाच इत्युक्ता च गीतस्य वसिष्ठस्य महा
त्मनः शिष्यस्याध्यायसर्वात्मा सर्वान्प्राह च गणनिधिः श्रीराम उवाच॥ सर्वे शृणुत भद्रं वो निश्चयेन सु निश्चितं श्रु
रो५ त्मज्ञानात्परं नास्ति गुरुरपि च तद्विद २०५ श्रीसिद्धादय ऊचुः॥ रामेवमेव सर्वेषां मनसि स्थितिमागतं त्वत्प्रसाद
च्च सकलं संवादेन दृढीकृतं १९ सुखि भव महाराज रामचंद्र नमोस्तुते वसिष्ठेनाप्यनुज्ञाता गच्छामो यथागतं
॥२७ श्रीवाल्मीकिरुवाच॥ एवमुक्त्वा गताः सर्वे राम संस्तवने रताः रामचंद्रस्य शिरसि पोष्पवृष्टिः पपात ह २०८ एतत्ते स
र्वमाख्यातं रामचंद्र कथानकं अनेन क्रम योगेन भरद्वाज सुखी भव १९
सर्वजनेभ्यः सर्वोत्कृष्टं ज्ञानमाहात्म्यं च स्वयं प्रसन्नमन्तुभूतं विश्वासदार्ढ्याय उपदिष्टवान् राह इत्युक्तेति ४ तद्विदः
श्रासविदइति गुणविशेषणं तदात्मतत्त्वं गुरूपदेशाद्वेत्तीति तद्विदः शिष्यस्य गुरोः परं नास्तीति वा १०२ स्थितिनिश्च
यं संवादेन एतं ग्रंथलक्षणेन त्वदुक्ति संवादेन च १०६ १०७ १०८ रामचंद्रस्य जीवन्मुक्तिविश्रांतिपर्यंत संवाद कथाल
द्व क्षणमननक्रमयोजनेति यावत् १०९ २० रामराम १०९
रामराम
३९३

पर्यालोच्य कंचित्कालमनुष्ठेयदेवकार्यादीनधिकारभारांश्च पर्यालोच्य पश्चात्समाधिं भजे इत्यर्थः ९९ पूदाराम इति गुरुणोक्तो
पिलयं वृहेक्षं गतो वा सार्धं श्रवणं भावाह्वाजादिकर चेष्टे परमा ध्वन किंचिद्धचेतदासः वसिष्ठः शरीरं संकल्पेन प्रविश्य
तदीय सुषुम्नानाड्या शनैर्हृदयपुंडरीकं विवेश प्रविश्य तदीयं विलीनं जीवोपाधिलिंगं घनकल्पवीजातः प्रविष्टो वायु
सदंर्गतमंकुरमिव वहिराचकर्षेति यावत् ९९ तस्य वहिराकर्षणे तदा विभीवक्रमेणात्रचिदाभासाभिव्यक्त्यात
क्तं तत्र प्रकाशवाह्यार्थदर्शनादिक्रममाह शक्तीति प्रथमं प्राणादिजीवभूतायाश्चाधारशक्तौ ततः प्राणविभी
तस्माद्वाज्यादिविषयान्पर्यालोच्याविनम्रमन् देवकार्यादिभारांश्च भज पुत्रसुखी भव ॥ ९९ श्रीवाल्मीकिरु
वाच ॥ इत्युक्तोपि यदाराम: किंचिन्नोवेलयं गतः तदा सुषुम्नया सोपि विवेश हृदयं शनैः ९९ शक्तिप्राणमनः

तेषु ततो मनस्यभिर्भवे

प्रसक्तिकरणो जीवः प्रकाशात्मको नाडिरंध्रसुषुप्ते सर्वकरणः प्रोन्मील्य नेत्रे शनैः द्व... ष्टोत्कृष्ट वसिष्ठमुख्या
विदुषो ति मुक्तं सर्वैर्गुणैः कृत्वा कस्यचिचारणादि रहितः सर्वान्प्रतीक्ष्यास्थितः १००=
वेतस्मिंश्च शक्तिश्चिदाभासभावेनानुप्रवेश संक्रमेति शक्तौ प्राणमनःप्रसक्तिकरणः अत एव तस्य प्रकाशात्मकस्य हृदुपाधिको
जीवः प्राणेन्हासर्वनाडीरंध्रेष्वनुप्रविश्य सुषुप्त्या निष्कृतानि सर्वाणि ज्ञानकर्मेन्द्रियसद्वाणानिकरणानि येन तथा ... ए१
विधः सन् शनैर्नेत्रे प्रोन्मील्य वहिः उत्कृष्टान् पूज्यान्वसिष्ठमुख्यान् विदुषः दृष्ट्वा स्वयं कृतकृत्यस्त्वान्निर्मुक्तसर्वेष
णः अत एव कस्यापि कर्तव्यस्याराज्यस्य चैवम्वहारस्यविचारणायो गुणदोषचिंतयाच्छादिपदातन्त्रयुक्तहानो
पादा...नादि कृत्याचर रहितः सन् ईदृशं मामेति किंवक्ष्यंतीति सर्वान्प्रतीक्ष्यास्थितइत्यर्थः १०० शुभम्

ग्रंकुल्यसर

वा०टी०
नि०पू०
३२६

उपसंहरति इति वरमुनेर्वशिष्ठस्य वचनपंक्तिर्लोणपारत्नमालया विचित्रा भविता इति उक्तरूपा रघुपतेर्जी
वन्मुक्तिसिद्धिर्यामपात्लिभ्यं प्रोदिता ज्ञानिनिखिलानां कविकुलानां योगिनांच सेव्यरूपा सा परमगुरुकटा
दा... दिता सेविता सती मुक्तिमार्गं प्रागुक्तभूमिकाक्रमं ददाति आरोपयतीत्यर्थः ११० विधिसंवादप्र
कारं मोहमालिन्यरागद्वेषमहापातकोपपातकादि सर्वदोषावस्थायुक्तोपि गुरुमुखश्रवणादेव सर्वदोषै
र्मुच्यते शांत्यादिगुणप्राप्तिक्रमेण ब्रह्म गच्छति प्राप्नोति किं पुनरधिकारीत्यर्थः १११ इति श्रीवाशिष्ठतात्प
र्यप्रकाशे निर्वाणप्रकरणे उत्तरार्धे अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८॥ इति श्रीमत्परमहंसपरिव्रा



इति रघुपतिसिद्धिः प्रोदिता यामपातेर्वरमुनिवचनासीद्रत्नमालाविचित्रा निखिलकविकुला
नां योगिनां सेव्यरूपा परमगुरुकटाक्षान्मुक्तिमार्गं ददाति ११० य इमं शृणुयान्नित्यं विधिरा
मवशिष्ठयोः सर्वावस्थोपि श्रवणान्मुच्यते ब्रह्म गच्छति १११ इत्यार्षे रचिते महारामायणे देवदूतो
क्ते द्वात्रिंशत्सहस्र्यां संहितायां वाल्मीकीये मोक्षोपाये निर्वाणप्रकरणे वाशिष्ठब्रह्मदर्शने राम
सुस्थानं नाम अष्टाविंश त्युत्तरशत तमः सर्गः ॥ १२८॥

जकाचार्य श्रीसर्वज्ञसरस्वतीपूज्यपादशिष्य श्रीरामचंद्रसरस्वतीपूज्यपादशिष्य श्रीगंगाधरेंद्रसर
स्वत्याख्यभिक्षोः शिष्येणानंदबोधेंद्रसरस्वत्या विरचिते श्रीवाशिष्ठतात्पर्यप्रकाशे निर्वाणप्रकरण रामः
सपूर्वार्धं संपूर्णं ॥ ० ग्रंथसंख्या १३६५० ॥ शुभंभूयात् ॥ रामः रामः रामः रामः ॥ ३२६